# 2022

## SANSKRIT — GENERAL

**Paper : GE/CC-1**

**(Sanskrit Poetry)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**(Marks : 20)**

**Unit - I**

1. (क) अधोलिखितयोः ***कस्यचिदेकस्य*** मातृभाषया अनुवादः कार्यः। 5

(अ) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

(आ) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।।

(ख) अधोलिखितयोः ***कस्यचिदेकस्य*** सप्रसङ्गं व्याख्या संस्कृतभाषया देवनागरलिप्या च कार्या। 5

(अ) मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।।

(आ) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

**Unit - II**

2. अधोलिखितेषु संक्षेपेण यथामति ***दशप्रश्नानाम्*** उत्तरं (एकं विहाय सर्वेषाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्)। 1×10

(क) 'रघुवंशम्' इति महाकाव्यस्य कियन्तः सर्गाः?

(ख) 'सोऽहमाजन्मशुद्धानाम्' – इत्यस्य कोऽर्थः?

(ग) का आसीत् सुदक्षिणा?

(घ) कस्मिन् वंशे दिलीपः आविर्भूतः?

(ঙ) 'आनाकरथवर्त्मनाम्' शब्दस्य कः अर्थः?

(च) 'रघुवंशम्' महाकाव्यस्य मुख्यः टीकाकारः कः?

(छ) पराक्रमेण दिलीपः केन सह उपमितः अभवत्?

(ज) मनीषिणां माननीयः कः आसीत्?

(झ) हेम्नः विशुद्धता कुत्र संलक्ष्यते?

(ञ) फलानुमेयाः प्रारम्भाः – कस्य कार्यारम्भाः फलानुमेयाः?

(ट) 'सेना' शब्दस्य कः अर्थः?

(ठ) "यथापराधदण्डानाम्"– के अपराधानुसारेण दण्डं दत्तवन्तः?

**Section - B**

**(Marks : 20)**

**Unit - I**

**3.** (क) महाकविरूपेण माघस्य गुणावली आलोच्यताम्। 10

***अथवा,***

(ख) शिशुपालवधम् इति काव्यस्य प्रथमसर्गानुसारं स्वर्गात् नारदस्य अवतरणं वर्ण्यताम्। 10

**Unit - II**

**4.** अधोलिखितेषु यथामति ***पञ्चप्रश्नानाम्*** उत्तरं संस्कृतभाषया देवनागरलिप्या च प्रदेयम्। 2×5

(क) शिशुपालः कः आसीत्?

(ख) श्रीकृष्णं प्रति इन्द्रस्य का वार्ता आसीत्?

(ग) 'स पुण्डरीकाक्ष इति स्फुटोऽभवत्'– अत्र पुण्डरीकाक्षः कः?

(घ) 'तदैकवर्णाविव तौ बभूवतुः'– अत्र 'तौ' इति पदेन कौ बोधितौ?

(ङ) 'बाडवजातवेदा'– इति पदस्य कः अर्थः?

(च) नारददर्शनस्य फलं किम् अस्ति?

(छ) शितिवासः कः भवति?

## Section - C
**(Marks : 10)**

### Unit - II

5. (क) अधोलिखितयोः ***कस्यापि एकस्य*** श्लोकस्य सप्रसङ्गं व्याख्या कार्या (संस्कृतभाषया देवनागरलिप्या च) 5

(अ) वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि॥

(आ) वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

(ख) निम्नलिखितयोः ***कस्यैकस्य*** मातृभाषया अनुवादं कुरु। 5

(अ) शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्॥

(आ) साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥

## Section - D
**(Marks : 15)**

### Unit - II

6. अधोलिखितेषु किमपि ***विषयत्रयमवलम्ब्य*** संक्षिप्ता टीका कार्या। 5×3

(क) मेघदूतम्

(ख) श्रीहर्षः

(ग) जयदेवः

(घ) बुद्धचरितम्

(ङ) किरातार्जुनीयम्।

---